

# Sri Vishnu Stuti - Dharmavyadha – Varaha Puranam

## ॥ श्रीविष्णु स्तुतिः - वराह पुराणम् ॥

The following is a rare hymn on **Lord Vishnu** found in **Varaha Purana**, **Chapter 8** which describes the life of **Dharmavyadha**. Upon utterance of this prayer, Lord Vishnu appears before him and gives a boon that his race will be righteous and devotees of Vishnu. Dharmavyadha's soul also attained immediate union with Lord as a light emanted from his body and merged with Lord.

One who utters this excellent hymn and listens to it always worshipping Vishnu and performing fast, especially on the day of Vishnu (Ekadashi?), would get Lord Vishnu's world and live there happy life for seventy Manvataras.

धर्मव्याध उवाच -

नमामि विष्णुं त्रिदशारि नाशनं - विशाल वक्षः स्थल संश्रित श्रियम् ।
सुशासनं नीतिमतां पराङ्गतिं - त्रिविक्रमं मन्दर धारिणं सदा ॥ १ ॥

दामोदरं निर्जित भूतलं धिया - यशों ऽ शुशुभ्रं भ्रमराङ्गसप्रभम् ।
भवे भवं दैत्य रिपुं पुरुष्टुतं - नमामि विष्णुं शरणं जनार्द्दनम् ॥ २ ॥

त्रिधा स्थितं तिग्म रथाङ्ग पाणिनं - नयस्थितं युक्तं अनुत्तमैर् गुणैः ।
निःश्रेयसाख्यं क्षयिते तरं गुरुं - नमामि विष्णुं पुरुषोत्तमं त्वहम् ॥ ३ ॥

महावराहो हविषां भुजो जनो - जनार्दनो मे हितकृच् चतुर्मुखः ।
क्षितीधरो मां उदधि प्लवे महान् - स पातु विष्णुः शरणार्थिनं तु माम् ॥ ४ ॥

मायाततं येन जगत्त्रयं कृतं - यथा ऽ ग्निनैकेन ततं चराचरम् ।
चराचरस्य स्वयमेव सर्वतः - स मेऽस्तु विष्णुः शरणं जगत्पतिः ॥ ५ ॥

भवे भवे यश् च ससर्ज कं ततो - जगत् प्रसूतं सचराचरं त्विदम् ।
ततश् च रुद्रात्मवति प्रलीयते - ततो हरिर् विष्णु हरस् तयोच्यते ॥ ६ ॥

स्वात्मेन्दु पृथ्वी पवनादि भास्करा - जलञ्च यस्य प्रभवन्ति मूर्त्तयः ।
स सर्वदा मे भगवान् सनातनो - ददातु शं विष्णुर् अचिन्त्य रूप धृक् ॥ ७ ॥

### ॥ फलश्रुतिः ॥

हरिं समभ्यर्च्य सदा ह्युपोषितो - विशेषतो विष्णु दिने च मानवः ।

स याति यत्र स्वयमेव केशवो - वसेत मन्वन्तर सप्ततिं सुखम् ॥ ८ ॥

**॥ इति श्री वाराहे पुराणे धर्मव्याध कृतं श्रीविष्णु स्तोत्रं सम्पूर्णम्॥**